दिनाङ्क :- 22/02/2026

प्रात: - 06:55

प्रधानमन्त्री-मेरठ

प्रधानमन्त्री नरेन्द्रमोदि अद्य उत्तरप्रदेशस्य मेरठ-नगरे मेरठ-मेट्रो तथा नमो-भारत-रेल-यानं हरितध्वजं प्रदर्शयिष्यति। देशस्य प्रथमोपक्रमे, मेरठ-मेट्रो भारतस्य द्रुततम-मेट्रो-व्यवस्था भविष्यति, येन यात्रा केवलं त्रिंशन्निमेषेषु एव सम्पूर्णतां याति। प्रधानमन्त्री प्रायः त्रयोदश-सहस्र-कोटि-रूप्यकाणां विविध-विकास-परियोजनानां उद्घाटनम् अपि करिष्यति। सः द्व्याशीति कि. मी. परिमितं यावत् दिल्ली-मेरठ-नमो-भारत-मार्गं राष्ट्राय लोकार्पयिष्यति तथा च भारतस्य प्रथमस्य नमो-भारत-क्षेत्रीय-द्रुतपरिवहन-व्यवस्थायाः शेषभागानाम् उद्घाटनमपि विधास्यति, यस्मिन् दिल्ली-नगरस्य सराय-काले-खाँ, न्यू-अशोक-नगरयोः मध्ये पञ्च कि. मी. परिमितं यावत् खण्डः, उत्तरप्रदेशस्य मेरठ-दक्षिण-मोदीपुरम्-नगरयोः मध्ये एकविंशति कि. मी. परिमितं यावत् भागः च अन्तर्भवति।

प्रधानमन्त्री/'मन की बात'-कार्यक्रमः

प्रधानमन्त्री नरेन्द्र-मोदी अद्य प्रातः एकादश वादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् एकत्रिंशदधिक-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शन-प्रधानमन्त्रिकार्यालय-सूचनाप्रसारण-कार्यालयानां यूट्यूब-वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात्-प्रसारणं भविष्यति। हिन्दीभाषायां प्रसारणस्य अनन्तरम् आकाशवाण्याम् अस्य प्रसारणं क्षेत्रीयासु भाषासु अपि भविष्यति।

प्रधानमंत्री सेमिण्कडक्टर

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः सायङ्काले उत्तरप्रदेशस्य गौतमबुद्धनगरस्य जेवर-क्षेत्रे यमुना-द्रुतमार्ग-औद्योगिक-विकास-प्राधिकरणे सेमिकण्डक्टर्-विनिर्माण-संयंत्रस्य आभासीय-माध्यमेन शिलान्यासः कृतः।

अस्मिन् अवसरे, श्रीमोदी अवदत् यत् उत्तरप्रदेशे एच्. सी. एल्.-फाक्स्कॉन् संयुक्त-उद्यम-परियोजनायाः-इण्डिया-चिप्-प्राईवेट-लिमिटेड इत्यस्य स्थापना प्रौद्योगिक्याः स्वावलंबन-क्षेत्रे एकं नूतनं सोपानम् अस्ति तथा च वैश्विक-चिप्-पर्यावरणव्यवस्थायां भारतस्य उपस्थितिं वर्धयिष्यति। प्रधानमन्त्री अवदत् यत्, एतत् दशकं भारतस्य टेक्-दशकम् अस्ति तथा च अस्मिन् दशके टेक-क्षेत्रे भारतं यत् कार्यं करोति तत् एकविंशति शताब्द्यां देशस्य शक्तेः आधारः भविष्यति।

अस्मिन् अवसरे केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् नोएडा-नगरे संस्थापितं संयंत्रं प्रायः सार्द्ध-त्रिकोटि-चिप्स्-उत्पादनं करिष्यति। इण्डिया ए. आई. इम्पैक्ट् समिट् 2026 इत्यस्य उल्लेखं कुर्वन् श्री वैष्णवः अवदत् यत् अस्मिन् भव्य-आयोजने अष्टादशाधिकैकशत देशाः संस्थाः च भागं भजितवन्तः।

<u>भारत-ब्राजील्</u>

ह्यः नवदिल्ल्यां भारत-ब्राजील्-देशौ डिजिटल्-सहभागित्वम्, दुर्लभ-भू-महत्त्वपूर्ण-रत्नानां च सहकारः, एम्. एस्. एम्. ई., तटीय-क्षेत्रम् इत्यादीनां विभिन्नेषु क्षेत्रेषु सन्धेः आदानप्रदानं कृतवन्तौ। प्रधानमन्त्री नरेन्द्रमोदी, ब्राजील्-देशस्य राष्ट्रपतिः लूयिज इनासियो लूला डा सिल्वा च राष्ट्रिय-राजधान्यां द्वैपाक्षिकं वार्तालापं कृतवन्तौ। उपवेशने, तौ द्वैपाक्षिकसम्बन्धानां सम्पूर्णस्य विस्तारस्य समीक्षाम् कृतवन्तौ। उभयोः मध्ये बहुपक्षीय-मञ्चेषु सहकारः, बहुपक्षवादस्य परिष्कारः, वैश्विक-शासनं, वैश्विक-दक्षिणसम्बद्धविषयाः इत्यादीनां परस्पर-हितानां क्षेत्रीय-वैश्विक-विषयेषु अपि विचारानां आदानप्रदानम् अभवत्। संयुक्त-वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् राष्ट्रपतेः लुला डा सिल्वा-वर्यस्य नेतृत्वे भारत-ब्राजील्-देशयोः सम्बन्धः सुदृढः अभवत् इति। सः अवदत् यत् अग्रिमेषु पञ्चवर्षेषु द्वैपाक्षिकव्यापारसम्बन्धाः विंशति बिलियन् यू. एस्. डालर्-तः अधिकाः भविष्यन्ति।

<u>क्रिकेट</u>

आई. सी. सी. विंशतिं प्रति विंशति विश्वचषक-क्रीडायाः शिर्षाष्ट इति सुपर-8 चरणस्य आरम्भः ह्यः अभवत्। भारतम् अद्य अहमदाबादस्य नरेन्द्र-मोदी-क्रीडाङ्गणे दक्षिण-आफ्रिका-दलस्य विरुद्धं स्वस्य सुपर-8 इत्याभियानस्य आरम्भं करिष्यति। भारतीयसमयानुसारं सायं सप्तवादने स्पर्धायाः आरम्भः भविष्यति।

।। <u>इति वार्ताः</u>।।